## दशमः पाठः
# ''छत्तीसगढराज्यस्य लोकभाषाः''(छत्तीसगढ़ की बोलियाँ)

PH9BFL

छत्तीसगढप्रदेशः लोकगीत, लोकनृत्य, लोकभाषाणां संगमस्थलमस्ति। लोकसंस्कृतेः दृष्ट्या सत्यं शिवं सुन्दरम् इत्युक्तेः अस्य राज्यस्य प्रखराभिव्यक्तिं प्रदर्शयति। छत्तीसगढराज्यस्य उत्तरदिशि झारखण्डप्रदेशः दक्षिणदिशि आंध्रप्रदेशः पूर्वदिशि उडीसाप्रदेशः पश्चिम दिशायां महाराष्ट्रप्रदेशाश्च विराजन्ते। छत्तीसगढप्रदेशः स्वकीयसंस्कृतिमधिकृत्य लोकप्रसिद्धः। छत्तीसगढराज्ये सप्तविंशतिजिलाः विद्यन्ते। अस्मिन् राज्ये विविधलोक भाषाभाषिणश्च निवसन्ति। छत्तीसगढराज्यस्य कटकः(राजधानी) रायपुरमस्ति यद् छत्तीसगढराज्यस्य हृदयस्थलम् अभिधीयते। रायपुरजिलान्तर्गतं हल्बी, गोडी, छत्तीसगढी, उडिया लोकभाषाश्च अतिप्रसिद्धाः। राज्यस्य उत्तरभागे कोरिया जिलास्ति। यत्र जनाः भोजपुरी, सरगुजिया, कुडुक, छत्तीसगढी लोकभाषायां च स्वकीयाभिव्यक्तिं कुर्वन्ति।



कोरिया जिला समीपे सरगुजा जिला स्थितास्ति। सरगुजा जिलायां सादरी, भोजपुरी, सरगुजिया, कुडुक, छत्तीसगढ़ी प्रभृतीनां लोकभाषाणां लोकजीवने प्रतिदिनं व्यवहारो भवति। राज्यस्य उत्तरदिशायामेव जशपुरजिला विद्यते। अस्यां जिलायां सादरी, भोजपुरी, कुडुक, छत्तीसगढी इत्यादयाः लोकभाषाश्च सुविख्याताः सन्ति। छत्तीसगढराज्यस्य विद्युत् केन्द्रः कोरबा जिलातिप्रसिद्धा। अस्मिन् क्षेत्रे छत्तीसगढी मागधी च लोकभाषां सर्वेजनाः वदन्ति। राज्यस्य उत्तरपूर्वस्यां रायगढजिला स्थितास्ति। अस्यां जिलायां सादरी, कुडुक, गोडी, छत्तीसगढी, उडिया, बंगाली च इति लोकभाषाः अतिप्रसिद्धाः। जनाः आसां लोकभाषाणां स्वकीयव्यवहारे प्रयोगं कुर्वन्ति।

छत्तीसगढराज्यस्य उत्तरदिशायामेव जांजगीर जिलाअस्ति। यत्र ''छत्तीसगढी'' लोकभाषायाः जनाः प्रयोगं कुर्वन्ति। राज्यस्य बिलासपुरजिलान्तर्गतं छत्तीसगढीबघेली च भाषाद्वयेन जनाः व्यवहरन्ति। एतादृशस्य छत्तीसगढस्य उत्तरपश्चिमदिशायां कवर्धादुर्गराजनांदगाँव जिला च विद्यन्ते। कवर्धा जिलायां गोडी छत्तीसगढी च लोकभाषाभ्यां परस्परं सस्नेहेन स्वविचारान् प्रस्तुवन्ति। दुर्ग जिलायां हल्बी–गोडी–छत्तीसगढी च लोकभाषाः इति प्रसिद्धाः, राजनादगाँव जिलान्तर्गतं हल्बीगौड़ीछत्तीसगढीमराठी च लोकभाषाः सुप्रसिद्धाः। छत्तीसगढस्य पूर्वदिशायां महासमुन्दजिला विराजते। यत्र जनाः छत्तीसगढीउडिया च लोकभाषा माध्यमेन स्वविचारान् प्रदर्शयन्ति।

छत्तीसगढराज्यस्य मध्यभागे धमतरी जिलास्ति। अत्र १८८५ ख्रीस्ततमे काव्योपाध्याय हीरालाल महाभागेन छत्तीसगढीभाषायाः प्रथमं व्याकरणं लिखितम्। धमतरी जिलायां हल्बीछत्तीसगढी च भाषे अतिप्रसिद्धे। राज्यस्य दक्षिणभागे काँकेरजिलास्ति अत्र हल्बीछत्तीसगढीमराठीबंगाली च लोकभाषाः अतिलोकप्रियाः। राज्यस्य दक्षिणदिशासु बस्तरजिला आदिवासीक्षेत्रस्य नाम्ना प्रसिद्धा। बस्तरे हल्बी–गोडी–भतरी–दोरली–परजी–गदबी–छत्तीसगढी–उडिया–प्रभृतयः लोकभाषाः प्रचलिताः। बस्तरस्य दक्षिणभागःएव दन्तेवाडा दन्तेश्वरीदेव्याः नाम्ना प्रसिद्धा। यत्र हल्बीगोंडीदोरली छत्तीसगढीउडियातेलुगु इत्यादयः लोकभाषाः प्रसिद्धाः। बीजापुर जिलान्तर्गतं तेलगु–गोडी–भतरी–हल्बी इत्यादयः लोकभाषाः अति प्रसिद्धाः। नारायणपुर जिलायां गोड़ी–हल्बी–दोरली–प्रभृतयः लोकभाषा प्रचलितः।

सुकमाजिलान्तर्गते छत्तीसगढी–भतरी–हल्बी–गोडी–दोरली–तेलगू–प्रभृतयः लोकभाषाः प्रचलिताः। कोण्डागाँवजिलान्तर्गते छत्तीसगढी–हल्बी–गोडी–भतरी–परजी–दोरली–गदबी–प्रभृतयः लोकभाषाः प्रसिद्धाः। गरियाबंद–जिलायां छत्तीसगढी–उडिया भाषे प्रचलिते। बलौदाबाजार–भाटापारा–जिलायां छत्तीसगढी गोडी च लोकभाषाद्वे प्रचलिते। बालोदजिलान्तर्गते छत्तीसगढी–गोडी–हल्बी प्रभृतयः लोकभाषाः लोकप्रियाः। बेमेतरा–जिलायां छत्तीसगढी–हल्बी–गोडी–लोकभाषाः प्रचलिताः। बलरामपुर–जिलायां छत्तीसगढी–सादरी–भोजपुरी लोकभाषाः प्रचलिताः। सूरजपुर–जिलान्तर्गते छत्तीसगढी–सादरी–भोजपुरी–सरगुजिहा–प्रभृतयः लोकभाषाः अतिप्रियाः। मुंगेली–जिलान्तर्गते छत्तीसगढी–बघेली–गोडी प्रभृतयः लोकभाषाः प्रचलिताः।

छत्तीसगढप्रदेशः एकम् उद्यानमिव प्रतीयते। अस्मिन् उद्याने नानाविधानि पुष्पाणि विकसन्ति। लोकभाषाणाम् एतानि पुष्पाणि छत्तीसगढ राज्यस्य एकतां परस्परस्नेहं च प्रदर्शयन्तीति।

## शब्दार्थाः

लोकभाषाः = बोलियाँ। लोकभाषाणाम् = बोलियों का। प्रदर्शयति = प्रदर्शित करता है। उत्तरदिशि = उत्तर दिशा में। स्वकीयम् = अपना। संस्कृतिमधिकृत्य = संस्कृति के विषय में। यद् = जो। अभिधीयते = कहते हैं। कुर्वन्ति = करते हैं। प्रभृतीनाम् = इत्यादि का। व्यवहरन्ति = व्यवहार करते हैं। वदन्ति = कहते हैं। विद्यन्ते = विद्यमान हैं। विराजते = स्थित है। विचारान् = विचारों को। दिशासु = दिशाओं में। नाम्ना प्रसिद्धा = नाम से प्रसिद्ध। उद्यानमिव (उद्यानम्+इव) = उद्यान के समान। प्रतीयते = प्रतीत होता है। नानाविधानि पुष्पाणि = अनेक प्रकार के पुष्प। विकसन्ति = विकसित होते हैं।

## अभ्यासः

**प्रश्न 1. निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखिए –**

(क) छत्तीसगढराज्यस्य स्थितिः का अस्ति ?

(ख) छत्तीसगढराज्ये कति जिलाः सन्ति ?

(ग) छत्तीसगढस्य हृदयस्थलं नगरं किमस्ति ?

(घ) निम्नांकित–जिलानां द्वे लोकभाषे लिखतु –

(1) रायपुर .............................. ..............................

(2) सरगुजा .............................. ..............................

(3) बेमेतरा ............................ ............................

(4) सुकमा ............................ ............................

(5) मुंगेली ............................ ............................

(6) गरियाबंद ............................ ............................

(7) धमतरी ............................ ............................

(8) रायगढ ............................ ............................

(9) जशपुर ............................ ............................

(10) बिलासपुर ............................ ............................

(11) दुर्ग ............................ ............................

(12) बस्तर ............................ ............................

(13) दन्तेवाड़ा ............................ ............................

(14) बीजापुर ............................ ............................

(15) नारायणपुर ............................ ............................

**प्रश्न 2. (क) राजनाँदगाँवजिलान्तर्गतं कति लोकभाषाः जनाः प्रयोगं कुर्वन्ति ?**

**(ख) का जिला आदिवासिक्षेत्रस्य नाम्ना प्रसिद्धा ?**

**(ग) छत्तीसगढप्रदेशः किमिव प्रतीयते ?**

**प्रश्न 3. पाठगत युग्म कीजिए –**

(1) काँकेर – भोजपुरी, सरगुजिया, कुडुक, भतरी, छत्तीसगढी, मागधी

(2) जाँजगीर – गोडी, छत्तीसगढी

(3) महासमुन्द – हल्बी, छत्तीसगढी, मराठी, बंगाली

(4) कोरिया – छत्तीसगढी

(5) जशपुर – सादरी, कुडुक, गोडी, छत्तीसगढी, उडिया, बंगाली

(6) कवर्धा – छत्तीसगढी, मागधी

(7) रायगढ़ – छत्तीसगढी, उडिया

(8) कोरबा – सादरी, भोजपुरी, कुडुक, छत्तीसगढी

**प्रश्न 4. निम्नधातु का लट् एवं लोट् लकार में प्रयोग कीजिए –**

(क) "कृ" (ख) "अस्"

**प्रश्न 5. संस्कृत में अनुवाद कीजिए –**

(क) यह लोकभाषा है।

(ख) छत्तीसगढ़ प्रदेश में सत्ताईस जिले हैं।

(ग) छत्तीसगढ़ प्रदेश में छत्तीसगढ़ी भाषा प्रसिद्ध है।

(घ) बस्तर जिला आदिवासी बाहुल्य क्षेत्र है।

(ङ) सरगुजा जिला में सरगुजिया बोली प्रसिद्ध है।

PHI7H9